WEST BENGAL STATE UNIVERSITY

B.A. Major 1st Semester Examination, 2025-26

# SANDSC101T/SANDSCN101T-SANSKRIT (MAJOR)

## FUNCTIONAL SANSKRIT AND METRE

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### UNIT-I
**[25 Marks]**

1. अधोलिखितेषु प्रश्नेषु यथेच्छं **पञ्चकस्य** संस्कृतभाषया देवनागरीलिप्या च अशुद्धिसंशोधनं क्रियताम्। 1×5 = 5

(क) मार्जारः दुग्धं पिबन्ति।

(ख) बालकः चित्रं दृश्यति।

(ग) अहम् श्वः गच्छामः।

(घ) प्राते गीतां पठामि।

(ङ) वृक्षस्य अधे ब्राह्मणः निष्ठति।

(च) सर्वे पर्वतेषु माणिक्यानि न भवन्ति।

(छ) शनै गच्छेत् मानवः।

2. अधोलिखितेषु अव्ययपदेषु यथेच्छं **पञ्चकस्य** संस्कृतभाषया देवनागरीलिप्या च वाक्यानि विरच्यन्ताम्। 1×5 = 5

(क) विना

(ख) परश्वः

(ग) अन्तरेण

(घ) परम्

(ङ) प्रातः

(च) सदा

(छ) कुत्र

3. संस्कृतभाषया देवनागरीलिप्या च यथेच्छं **पञ्चानां** वाच्यपरिवर्तनं क्रियताम्। 1×5 = 5

(क) अहं पठामि।

(ख) पुस्तकं पठति बालकः।

(ग) रामेण वनं गतम्।

(घ) युष्माभिः ग्रन्थः पठ्यते।

(ङ) शिष्यः वेदान् पठितबान्।

(च) बालकः गृहे स्वपिति।

(छ) तेन त्वं वदितव्यः।

Turn Over



1154_1308

4. अधोलिखितेषु यथेच्छम् **एकस्य** संस्कृतभाषया देवनागरीलिप्या च अनुवादः करणीयः। 10

(क) Sanskrit is a very old and important language of ancient India. It gaves the early knowledge about yoga, mathematics, and science. Even today, many words in other Indian languages come directly from Sanskrit. Learning about this heritage helps us to understand the true culture and history of India.

সংস্কৃত ভারতের একটি অতি প্রাচীন এবং অত্যন্ত গুরুত্বপূর্ণ ভাষা। এই ভাষাটি বহু কাল আগেই যোগব্যায়াম, গণিত এবং বিজ্ঞানের শিক্ষা দিয়েছে। আজও ভারতের অন্যান্য ভাষার অনেক শব্দ সরাসরি সংস্কৃত থেকেই এসেছে। এই ঐতিহ্য সম্পর্কে জানলে আমরা ভারতের প্রকৃত সংস্কৃতি এবং ইতিহাস বুঝতে পারি।

(ख) A girl goes to school everyday. She reads books and writes in her notebook. Her teacher teaches lessons with care. She plays with her friends. Learning makes her happy.

প্রতিদিন বালিকাটি বিদ্যালয়ে যায়। সে বই পড়ে এবং খাতায় লেখে। তার শিক্ষকমহাশয় যত্ন সহকারে পাঠ শেখান। সে বন্ধুদের সাথে খেলাধুলা করে। পড়াশোনা তাকে আনন্দ দেয়।

## UNIT-II

**[25 Marks]**

5. अधोलिखितेषु **प्रश्नपञ्चकं** समाधेयम्। तेषु **यथेच्छमेकः** संस्कृतभाषया देवनागरीलिप्या च समाधेयः। 2×5 = 10

(क) अक्षरस्य स्वरूपं किम् ?

(ख) का तावत् यतिः ? उदाहरणं प्रदेयम्।

(ग) किं समवृत्तं पद्यम् ? उदाहरणं प्रदेयम्।

(घ) सलक्षणं मालिनीछन्दसः यतिः निर्णेया।

(ङ) कानि अक्षराणि सन्ति शालिनीछन्दसि ? किं च तस्याः लक्षणम् ?

(च) सोदाहरणं र-गणस्य स्वरूपं देयम्।

(छ) कस्मिन् गणे सर्वाणि गुर्वक्षराणि सन्ति ? उदाहरणं प्रदेयम्।

6. **यथेच्छमेकस्य** छन्दोनिर्णयः करणीयः। 5×1 = 5

(क) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥

(ख) या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥

7. **यथेच्छमेकस्य** उत्तरं देयम्। 10

(क) छन्दःशास्त्रे कानि तावत् लघ्वक्षराणि गुर्वक्षराणि च ? सोदाहरणं तानि व्याख्येयानि।

(ख) शार्दूलविक्रीडितच्छन्दसः लक्षणं सोदाहरणं व्याख्येयम्।

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Major 3rd Semester Examination, 2025-26

## SANDSC303T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours

Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### UNIT-I

**[F.M. - 25]**

1. अधोलिखितानां ***यथेच्छमेकस्य*** प्रश्नस्य उत्तरं देयम् — 10×1 = 10

(क) कवीनां प्रकारभेदः वामनमतेन सविस्तरं व्याख्यायताम्।

(ख) शब्दगुणानां नामानि उल्लिख्य त्रयाणां गुणानां सोदाहरणं व्याख्या प्रदेया।

2. अधोलिखितानां यथेच्छं ***पञ्चानां*** प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्। — 2×5 = 10

(क) रीतिः कतिविधा ? काश्च ताः ?

(ख) अलंकारशब्दस्य व्युत्पत्तिलभ्यः अर्थः लेख्यः।

(ग) अरोचकीशब्दस्य कोऽर्थः ?

(घ) का तावद् वृद्धसेवा वामनमतेन निरूप्यताम् ?

(ङ) काव्यस्य प्रयोजनानि कानि ?

(च) किं नाम लक्ष्यज्ञत्वम् ?

(छ) का तावत् प्रतिभा वामनदिशा लेख्या ?

3. निम्नलिखितानां यथेच्छं ***विषयमेकमवलम्ब्य*** संस्कृतभाषया देवनागरीलिप्या च टीका लेख्या। — 5

प्रकीर्णम्, विद्या, समाधिः

### UNIT-II

**[F.M. - 10]**

4. निम्नलिखितानां यथेच्छं ***विषयद्वयमवलम्ब्य*** संस्कृतभाषया देवनागरीलिप्या च टीका विरचनीया। — 5×2 = 10

कथा, प्रकरणम्, खण्डकाव्यम्, अभिनयः

## UNIT-III

**[F.M. - 15]**

5. निम्नलिखितानां ***यथेच्छमलंकारत्रयम्*** साहित्यदर्पणानुसारं सोदाहरणं संस्कृतभाषया देवनागरीलिप्या च व्याख्यायताम्। 5×3 = 15

श्लेषः, अप्रस्तुतप्रशंसा, दीपकम्, व्यतिरेकः, भ्रान्तिमान्

**अथवा**

अधोलिखितानां श्लोकानां यथेच्छं ***त्रितयस्य*** ससंज्ञमलंकारः निरूप्यताम् (संस्कृतभाषया देवनागरीलिप्या च) 5× 3= 15

(क) किं तारुण्यतरोरियं रसभरोद्भिन्ना नवा वल्लरी।
वेलाप्रोच्छलितस्य किं लहरिका लावण्यवारांनिधेः ॥

(ख) नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनभंगाः।
नायं शशी कुण्डलितो फणीन्द्रो नासौ कलंकः शयितो मुरारिः ॥

(ग) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥

(घ) धन्यासि वैदर्भि गुणैरुदारैर्यथा समाकृष्यत नैषधोऽपि।
इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति ॥

(ङ) अनायासकृशं मध्यमशंकतरले दृशौ।
अभूषणमनोहारि वपुर्वयसि सुभ्रूवः ॥

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Major 5th Semester Examination, 2025-26

## SANDSC508T-SANSKRIT (MAJOR)

### PANINIAN GRAMMAR - VAIYAKARANASIDDHANTAKAUMUDI

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

## UNIT-I

**[Marks : 30]**

1. ***यथेच्छमेकः*** प्रश्नः समाधेयः। 10×1 = 10

(क) को नाम प्रत्याहारः ? प्रत्याहारसंज्ञाविधायकं सूत्रमुल्लिख्य व्याख्यायताम्।

(ख) हलन्त्यमिति सूत्रस्य द्विरुच्चारणं कथं कृतम् ?

(ग) को नाम उपदेशः ? उपदेशे कस्य इत्संज्ञा भवति ? रप्रत्याहारः कथं निर्मीयते ? प्रत्याहारेषु इतां ग्रहणं कथं न सम्भवति ?

2. अधोलिखितेषु ***सूत्रद्वयं*** व्याख्येयम्। 5×2 = 10

(क) तुल्यास्यप्रयत्नं सवर्णम्।

(ख) मुखनासिकावचनोऽनुनासिकः।

(ग) इको गुणवृद्धी।

(घ) स्थानेऽन्तरतमः।

3. अधोलिखितेषु ***द्वयोः*** टीका लेख्या। 5×2 = 10

(क) पदम्।

(ख) वृद्धिः।

(ग) गुणः।

(घ) मुनित्रयम्।

## UNIT-II

**[Marks : 20]**

4. अधोलिखितेषु यथेच्छं ***पञ्च*** प्रश्नाः समाधेयाः। 2×5 = 10

(क) सुधी उपास्यः इत्यत्र सन्धौ कति रूपाणि ? कानि च तानि ?

(ख) 'अनचि' च इति सूत्रस्य कोऽर्थः ?

(ग) मधु अरि इत्यस्य सन्धौ किं रूपम् ? केन च सूत्रेण ?

(घ) 'एचोऽयवावायः' इति सूत्रस्यार्थो लेख्यः।

(ङ) परम ऋतः — सन्धौ किं रूपम् ?

(च) दीर्घविधायकं सूत्रं सार्थं सोदाहरणं लेख्यम्।

(छ) गुणविधायकं सूत्रं सार्थं सोदाहरणं लेख्यम्।

(ज) 'हरि एहि' इत्यत्र कथं न सन्धिः ?

5. यथेच्छं ***चतुर्णां*** पदानां सन्धिच्छेदं कृत्वा ससूत्रं रूपसिद्धिः कार्या। $2\frac{1}{2}\times 4 = 10$

उपैति, प्राच्र्छति, मनीषा, लाकृतिः, विष्णवे, पतञ्जलिः, विष्णूदयः

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Major 5th Semester Examination, 2025-26

## SANDSC509T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours

Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।

### क-विभागः

1. अधःप्रदत्तेषु मन्त्रेषु ऋषिच्छन्दोदेवताविनियोग निर्देशपुरःसरं ***यथेच्छमेकं*** व्याख्येयम्। 5

(क) अग्निमीले पुरोहितं
यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्॥

(ख) अहं राष्ट्री संगमनी वसूनां
चिकितुषी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा
भूरिस्थात्रां भूर्यावेशयन्तीम्॥

2. अधो लिखितेषु विनियोगवाक्येषु ***यथेच्छमेकं*** व्याख्येयम्। 5

(क) तत्र 'अग्निमीले' इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम्।

(ख) तस्मिन् सूक्ते प्रथमाया ऋचीं द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः।

3. अधो लिखितेषु मन्त्रेषु ***यथेच्छमेकस्य*** मन्त्रस्य पदपाठो विधेयः। 5

(क) अग्निमीले पुरोहितं
यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्॥

(ख) अहं रुद्रेभिर्वसुभिश्चरा-

म्यहमादित्यैरुत विश्वदेवैः ।

अहं मित्रावरुणोभा बिभ-

र्म्यहमिन्द्राग्नी अहमश्विनोभा ॥

4. अधोलिखितानां यथेच्छं ***पदद्वयमधिकृत्य*** व्याकरणसम्मता टीका लेख्या। $2\frac{1}{2}\times 2=5$

रत्नधातमम्, वक्षति, अश्नवत्, चिकितुषी

## ख-विभागः

5. अधोलिखितेषु प्रश्नेषु ***यथेच्छमेकस्य*** प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) मनुमत्स्यकथा कुत्र वर्तते ? अस्याः कथायाः वर्णनं कृत्वा वैदिकसाहित्येषु तस्याः गुरुत्वं प्रतिपादयत्। 2+6+2

(ख) रुद्रस्तुतिः कस्मिन् वेदे कस्मिन् अध्याये च वर्तते ? सूक्तस्यास्य प्रतिपाद्यं रूद्रदेवतायाः स्वरूपं यथाधीतं वैशद्येन विव्रियताम्। 1+1+8

6. अधोलिखितेषु प्रश्नेषु यथेच्छं ***पञ्च*** प्रश्नाः समाधेयाः। 2× 5= 10

(क) रूद्रस्य तनुः कीदृशी आसीत् ?

(ख) शुक्लयजुर्वेदस्य सुप्रसिद्धौ द्वौ भाष्यकारौ कौ ?

(ग) रूद्रदेवः ताम्रः अरूणश्चेति कथमुच्यते ?

(घ) 'गिरिशन्त' इति पदस्य कोऽर्थः ?

(ङ) रूद्रः कथं 'कपर्दी' इत्युच्यते ? तस्य आयुधद्वयं किम् ?

(च) ".... नीलग्रीवाय सहस्राक्षाय मीढुषे" — इत्यत्र 'नीलग्रीवाय' 'सहस्राक्षाय' चेति पदयोः कः अर्थः ?

(छ) कः मात्स्यान्यायः ?

(ज) किं तावत् मनोरवसर्पणम् ?

## ग-विभागः

7. अधःप्रदत्तेषु विषयेषु यथेच्छं ***द्वयमाश्रित्य*** टीका लेख्या। 5×2 = 10

(क) वैदिकस्वरः

(ख) वैदिकलेट्लकारः

(ग) अवग्रहः

(घ) वैदिकतुमर्थकप्रत्ययः।

——×——

# WEST BENGAL STATE UNIVERSITY
B.A. Major 5th Semester Examination, 2025-26

## SANDSC510T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### UNIT-I

### (Marks – 30)

1. ***यथेच्छमेकस्य*** प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) शब्दानुशासनस्य प्रयोजनानि अधिकृत्य एको निबन्धः विरच्यताम्।

(ख) गौरित्यत्र कः शब्द इति महाभाष्यवचनं पतञ्जलिदिशा विचार्यताम्।

2. अधोलिखितानां यथेच्छं ***द्वयं*** व्याख्येयम्। 5×2= 10

(क) वाग्योगविद् दुष्यनि चापशब्दैः।

(ख) चत्वारि वाक्परिमिता पदानि।

(ग) सिद्धे शब्दार्थसम्बन्धे।

(घ) स वाग्वज्रो यजमानं हिनस्ति।

3. अधोलिखितेषु ***पञ्च*** प्रश्नाः समाधेयाः। 2×5 = 10

(क) शब्दानुशासनपदेन केषां शब्दानाम् अनुशासनं क्रियते ?

(ख) भाष्यकारमतेन शब्दस्य किमपि लक्षणमेकं लिखतु।

(ग) असुराः कथं पराबभूकुः ?

(घ) क एव वाग्योग्विद् ?

(ङ) गौरित्यस्य शब्दस्य के अपभ्रंशाः ?

(च) एकस्य सिद्धशब्दस्य तथा एकस्य साध्यशब्दस्य च उदाहरणं लेख्यम्।

(छ) महाभाष्यग्रन्थस्य नामकरणे किमर्थं भाष्यशब्दस्य प्राक् "महा"-शब्दः प्रदत्तः ?

## UNIT-II

**(Marks – 20)**

4. यथामति **पञ्च** प्रश्नाः समाधेयाः । $2\times5 = 10$

(क) समीभवनस्य स्वरूपं व्याख्यायताम् ।

(ख) ग्रीमसूत्रस्य मूलं वक्तव्यं किम् ?

(ग) किं नाम ध्वनिसूत्रम् ?

(घ) "I.E." इत्यस्य सम्पूर्णं नाम लिख्यताम् ।

(ङ) पृथिव्यां कति भाषापरिवाराः ?

(च) 'Centum-Satem' इति भाषाविभाजनं कः कृतवान् ?

(छ) Collitz's Law केन कदा प्रवर्तितम् ?

5. अधोलिखितेषु यथेच्छं ***द्वयोः*** उत्तरं लेखनीयम् । $5\times 2= 10$

(क) नव्यभारतीया आर्यभाषा

(ख) अपश्रुतिः

(ग) विपर्ययः

(घ) आदिस्वरागमः ।

# WEST BENGAL STATE UNIVERSITY

B.A. Major 5th Semester Examination, 2025-26

## SANDSC511T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours　　　　Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

**सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम् ।**

**UNIT-I**

**[Marks - 20]**

1. अधोलिखितेषु सूत्रेषु ***द्वयोः*** सुरगिरा देवनागरीलिप्या च व्याख्या कार्या ।　　5×2 = 10

(क) अमि पूर्वः

(ख) नादिचि

(ग) एङ्ह्रस्वात्संबुद्धेः

(घ) अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ।

2. अधोलिखितेषु ***पदद्वयस्य*** ससूत्रं सुरगिरा देवनागरीलिप्या च साधनरीतिः प्रदर्श्यताम् ।　　5×2 = 10

(क) रामः

(ख) रामाय

(ग) सर्वे

(घ) सर्वेषाम् ।

**UNIT-II**

**[Marks - 20]**

3. अधःप्रदत्तेषु ***पदद्वयस्य*** ससूत्रं सुरगिरा देवनागरीलिप्या च साधनरीतिः प्रदर्श्यताम् ।　　5×2 = 10

(क) भवति

(ख) बभूव

(ग) एधन्ते

(घ) एधेते ।

4. सूत्रद्वयस्य सोदाहरणं सुरगिरा देवनागरीलिप्या च व्याख्या कार्या। 5×2 = 10

(क) आर्धधातुकस्येड्वलादेः

(ख) कर्तरि शप्

(ग) स्वरितञितः कर्त्रभिप्राये क्रियाफले

(घ) परोक्षे लिट्

## UNIT-III

### [Marks - 10]

5. पञ्च प्रश्नाः सुरगिरा देवनागरीलिप्या च समाधेयाः। 2×5= 10

(क) कति प्रकाराः कृत्यप्रत्ययाः सन्ति ? कानि च तानि ?

(ख) कृत्यप्रत्ययानां कृत्-संज्ञा अपि अस्ति वा ? संक्षेपेण लिखत।

(ग) क्यप्-प्रत्ययस्य इत्संज्ञकस्य पकारस्य किं फलम् ? उदाहरणयोगेन स्पष्टीक्रियताम्।

(घ) अनीयर्-प्रत्ययः अजन्तात् धातोः हलन्तात् धातोः वा भवति ? उदाहरणं दीयताम्।

(ङ) 'भोज्यम्' 'भोग्यम्' इति पदयोः अर्थपार्थक्यं किम् ?

(च) 'पोरदुपधात्' इति सूत्रस्य कः अर्थः ? सूत्रस्य अस्य उदाहरणं किम् ?

(छ) ण्यत्-प्रत्ययः कुत्र भवति ? ण्यत्-प्रत्ययविधायकं सूत्रं किम् ?

——×——